साधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान् इति"। विचित्रकार्य्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते" इति। एतेन "नमस्तत् कर्मभ्योविधिरपि न येभ्यः प्रभवतीत्युक्तिस्तु प्रामादिकीत्यवसेयम् एवञ्च ईश्वराधिष्ठितकर्मभ्य एव तत्तत्फलोत्पत्तिरिति सुस्थम्। कर्मणामाशुविनाशिनामपि सूक्ष्मरूपेणैव स्वकारणेऽन्तःकरणे सत्त्वात् "क्षीयन्ते चास्य कर्म्माणि" इत्याद्युक्तिः सङ्गच्छते तज्जन्यापूर्व्वस्वीकारे तु तत्र तज्जन्यं लक्षणेति भेदः। अतएव "ज्ञानाग्निः सर्वकर्म्माणीत्यादौ सूक्ष्मावस्थानां ज्ञानादेव क्षयः, स्थूलावस्थापन्नानान्तु आशुनाशात्" इति वेदान्तिमते युक्तिरूहनीया। "आत्मान्तरगुणानामात्मान्तरेऽकारणत्वादिति" वै०सू० "आत्मान्तरस्य गुणानां पुण्यपापानामात्मान्तरेऽकारणत्वात् स्वर्गफलस्येति शेषः। "शास्त्रदेशितं फलमनुष्ठातरीति" जै०सू०। "आत्मान्तरे यौ सुखदुःखगुणौ तयोरकारणत्वात् प्रत्यात्मनिष्ठाभ्यामेव धर्म्माधर्माभ्यां सुखदुःखे, न व्यधिकरणाभ्याम्। अन्यथा येन यागहिंसादिकं न कृतं तस्य तत्फलं स्यादिति कृतहानिरकृताभ्यागमस्य प्रसज्येतेति" एतच्च सामान्यशास्त्रं विशेषशास्त्रेणापोद्यते तेन पितृयज्ञादेः पुत्रपूतत्वादिहेतुत्वमिति" वै०सू० उपस्कारः। तच्चापूर्व्वं त्रिविधं प्रधानापूर्व्वमङ्गापूर्वं कलिकापूर्वञ्चेति मीमांसकाः। तत्र दर्शपौर्णमासाद्यपूर्वं प्रधानापूर्वं तदेव परमापूर्वं, प्रयाजाद्यङ्गजन्यापूर्वमङ्गापूर्वं, तदवान्तरक्रियाकूटजन्यमपूर्वं कलिकापूर्वं तच्च व्रीहिप्रोक्षणाभ्युक्षणादिजन्यं द्रव्यनिष्ठमिति मीमांसकाः तज्जन्यसंस्कारविशेष एव कलिकापूर्व्वतया व्यवह्रियते स चात्मनिष्ठ इति नैयायिकाः विस्तरस्तु कुसुमाञ्जलौ १ स्तवके दृश्यः। कलिकापूर्वञ्च परमापूर्वं जनयित्वा नश्यति। अङ्गापूर्वैस्तु परमापूर्वे विशेष आधीयते इति भेदः तथा च अङ्गापूर्वसहितं परमापूर्वं विशिष्टफलं जनयति तद्विहीनन्तु स्वल्पं फलम्। अत एव प्रधानकरणे दैवात् शक्याङ्गाकरणे न प्रधानस्य वैफल्यं किन्तु अल्पफलत्वमेवेति सिद्धान्तः। केवलाङ्गापूर्वाणां तु न फलजनकत्वम् प्रधानासिद्धेः फलाभावात्। अतएव "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। अप्रधानाक्रियायान्तु नावृत्तिर्न च तत्क्रियेति" छन्दोगपरिशिष्टे तथा व्यवस्थापितम्। इदञ्च परमापूर्वं फलनाश्यं तत्त्वज्ञाननाश्यं कर्मनाशाजलस्पर्शादिनाश्यञ्च। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति" "कर्मणाञ्चैव सर्वेषां भोगादेव क्षयोभवेदिति" च शास्त्रात् "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुनेति" गीतावाक्याच्च। सर्वकर्मपदेन च प्रारब्धकर्म्मातिरिक्तकर्म्माण्येवोच्यन्ते तेन प्रारब्धकर्मणां भोगादेव क्षय इत्यनुपदं वक्ष्यते। परमापूर्वञ्च नित्यकर्मणि पाण्डापूर्वत्वेन मीमांसकैः व्यवह्रियते सन्ध्यावन्दनस्य किञ्चित्फलाजनकत्वात्। अर्थवादोपस्थापितब्रह्मलोकादिप्राप्तिरूपफलजननात् न तत्रापूर्वस्य फलाजनकत्वेन पाण्डत्वमिति नैयायिकाः। अत एव चिन्तामणौ यत्रार्थवादिकं फलं न श्रूयते तत्र तत्त्वज्ञामसाधनत्वं गीतादिवाक्येन व्यवस्थापितं तच्च पूर्वं दर्शितम्। "न कलञ्जं भक्षयेदित्यादि निषेधस्यापि पाण्डापूर्वजनकत्वमिति मीमांसकाः। तत्रापि प्रत्ययाभावरूपफलाङ्गीकारान्न पाण्डत्वमिति तत्त्वज्ञानप्रतिबन्धकाभावत्वेन तस्यापीष्टत्वादिति नैयायिकाः। अपूर्वस्यापूर्वशब्दवाच्यत्वे हेतुर्जैमिनिना दर्शितः। "प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्" सूत्रेण व्याख्यातञ्चैतत् अदृष्टशब्दे ११६ पृष्ठे ततश्च पूर्वमविद्यमानत्वात् अपूर्वशब्दवाच्यतेति। वेदान्तिनस्तु कर्म्मणः सूक्ष्मावस्था, फलस्य पूर्व्वावस्था वाऽपूर्वमिति स्वीचक्रुः तच्चानुपदं दर्शितम्। तत्त्वज्ञानेन कर्मक्षये कश्चिद्विशेषोऽभिधीयते। "तदधिगम उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" शा०सू० भाष्ये "अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः किन्तावत् प्राप्तं फलहेतुत्वात् कर्म्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता यदि तदन्तरेणैव फलोपभोगमुपक्षीयेत, स्मृतिः कदर्थिता स्यात्। स्मरन्ति च "नहि कर्म्म क्षीयत" इति। नन्वेवं सति प्रायश्चित्तोपदेशोनिरर्थकः प्राप्नोति। नैष दोषः प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्गृहेष्ट्यादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षपणार्थता नत्वेवं ब्रह्मविद्यायाविधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्म्मक्षये, तत्फलस्यावश्यभोक्तव्यत्वादनिर्म्मोक्षः स्यात्। नेत्युच्यते। देशकालनिमित्तापेक्षोमोक्षः कर्म्मफलवद्भविष्यति। तस्मान्न ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः। तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्व्वाघयोरश्लेषविनाशौ भवतः उत्तरस्याश्लेषः पूर्वस्य विनाशः। कस्मात्? तद्व्यपदेशात्। तथा हि ब्रह्मविद्याप्रक्रियायां